१

सुप्रभातस्तोत्रम्

१

घृणामये ३७ स्मरस्त्वं स्मरहरं स्मरणमे स्मरद्विवं स्तु जनं च
मो सक्तो यमैधमर्वं अपहाय रघूद्वहं अन्यायहं न कस्य
ना चन वं कं नज्ञानु भजे ३८ विना वेंकटेशं न नाथो न नाथः
सदा वेंकटेशं स्मरामि स्मरामि हरे वेंकटेश प्रसीद
प्रसीद प्रियं वेंकटेश प्रयच्छ प्रयच्छ ३९ अहं दूर
तस्थापादांभोजयुग्मप्रणामेच्छयागत्य सेवां करो
मि सकृत्सेवया नित्यसेवाफलं त्वं प्रयच्छ प्रयच्छ
प्रभो वेंकटेश ४० अज्ञानिना मया दोषानशे
षान्विहितान् हरेः क्षमस्व त्वं क्षमस्व त्वं शेष
शैलशिखामणे ४१ ईशानां जगतोस्य वेंकटपते
र्विष्णोः परां प्रेयसीं तद्वक्षःस्थल नित्यवासरसिकां
तत्क्षान्तिसंवर्धिनीं पद्मालंकृतपाणिपल्लवयुगां
पद्मासनस्थां श्रियं वात्सल्यादिगुणोज्ज्वलां भगा
वतीं वंदे जगन्मातरं ४१ इति श्रीवेंकटनाचार्य
विरचितं सुप्रभातस्तोत्रं संपूर्णं शुभं भूयात् श्रीराम

श्रीवेंकटेशायनमः श्रीगणेशायनमः ॥ वंदे श्री २४४२
नयनोत्पलद्वयमपि नंदेभसाचलाधीश्वरं च सा सुप्रभातस्तो
र्चितपादपद्मयुगलं लोकैकनेत्रोत्सवं श्रीभूनीडेश
नकादिभीः सनियतं संभावनं सदा संसक्तानाम
खिलार्थदायिनमहं श्रीवेंकटेशं गुरुं १ कौसल्या
सुप्रजाराम पूर्वासंध्या प्रवर्त्तते उत्तिष्ठ नरशार्दू
ल कर्त्तव्यं दैवमाह्निकं २ मातः समस्तजगतां म
धुकैटभारेर्वक्षोविहारिणि मनोहरदिव्यरूपे श्री
स्वामिनि श्रितजनप्रियदानशीले श्रीवेंकटेशदयि
ते तव सुप्रभातं ३ तव सुप्रभातमरविंदलोचने भ
वतु प्रसन्नमुखचंद्रमंडले विधिशंकरेंद्रवनिता
भिरर्चिते वृषशैलनाथदयिते दयानिधे ४ अ
त्र्यादिसप्तऋषयः समुपास्य संध्यामाकाशसिंधु
कमलानि मनोहराणि आदाय पादयुगमर्चयितुं प्र
पन्नाः शेषाद्रिशेखरविभो तव सुप्रभातं ५ पंचान
नाब्जभवषण्मुखवासवाद्याः त्रैविक्रमादिच
रितं विबुधाः स्तुवंति भाषापतिः पठति वासर

शुद्धिमात्मशेषाद्रिशेखरविभो तव सुप्रभातं ६
ईषत्प्रफुल्लसरसीरुहनारिकेलपूगद्रुमादि सुमनो
हरपालिकानां आवाति मंदमनिलैः सहदिव्य
गंधैः शेषाद्रिशेखरविभो तव सुप्रभातं ७ उन्मील्य
नेत्रयुगमुत्तमपंजरस्थाः पात्रावशिष्टकदलीफ
लपायसानि भुक्त्वा सलीलमथ केलिशुकाः पठं
ति शेषाद्रिशेखरविभो तव सुप्रभातं ८ तंत्री
प्रकर्षमधुरस्वनया विपंच्या गायत्यनंतचरितं त
व नारदोपि भाषासमग्रमसकृत्करचाररम्या
शेषाद्रिशेखरविभो तव सुप्रभातं ९ भृंगावली च
मकरंदरसानुविद्धझंकारगीतनिनदैः सहसेव
नाय निर्यात्युपांतसरसीकमलोदरेभ्यः शेषा
द्रिशेखरविभो तव सुप्रभातं १० योषागणेन वर
दध्निविमथ्यमाने घोषालयेषु दधिमं[illegible]
घोषाः रोषात्कलिं विदधते ककुभश्च कुंभाः शे[illegible]
द्रिशेखरविभो तव सुप्रभातं ११ पद्मे[illegible]
कृतालिवर्गा हर्तुं श्रियं कुवलयस्य निजां[illegible]

काव्यसौरिस्वर्भानुकेतुदिविषत्परिषत्प्रधानाः त्वद्दास
दासचरमावधिदासदासाः श्रीवेंकटाचलपतेतवसुप्रभा
तं १८ त्वत्पाददधूलिभरितःस्फुरितोत्तमांगाः स्व
र्गापवर्गनिरपेक्षनिजांतरंगाः कल्पागमाकलि
नयाकलितांतरंमते श्रीवेंकटाचलपतेतवसुप्रभा
तं १९ त्वद्गोपुराग्रशिखराणिनिरीक्षमाणाः स्व
र्गापवर्गपदवींपरमाश्रयंते मर्त्यामनुष्यभवने
मतिमाश्रयंते श्रीवेंकटाचलपतेतवसुप्रभातं
२० श्रीभूमिनायकदयादिगुणामृताब्धे देवाधि
देवजगदेकशरण्यमूर्ते श्रीमन्ननंतगरुडादिभिर
र्चितांघ्रि श्रीवेंकटाचलपतेतवसुप्रभातं २१ श्री
पद्मनाभपुरुषोत्तमवासुदेववैकुंठमाधवजना
र्दनचक्रपाणेश्रीवत्सचिन्हशरणागतपारिजात
श्रीवेंकटाचलपतेतवसुप्रभातं २२ कंदर्पदर्पह
रसुंदरदिव्यमूर्ते कांताकुचांबुरुहकुड्मललोलदृ
ष्टे कल्याण [illegible] गुणाकरदिव्यकीर्ते श्रीवेंकटा
चलपतेतवसुप्रभातं २३ मीनाकृतेकमठकोल २

3

री निनादमिव बिभ्रति तीव्रघोषं शेषाद्रिशेखरविभो
तव सुप्रभातं १२ श्रीमन्नभीष्टवरदाखिललोकब
न्धो श्रीश्रीनिवास जगदेकदयैकसिंधो ऽल श्रीदेवता
गृहभुजांतरदिव्यमूर्ते श्रीवेंकटाचलपते तव सुप्रभा
तं १३ श्रीशेषशैलगरुडाचलवेंकटाद्रिनारायणाद्रिवृ
षभाद्रिवृषाद्रिमुख्यां आख्यांत्वदीयवसतेरनिशं
वदंति श्रीवेंकटाचलपते तव सुप्रभातं १४ श्रीस्वा
मिपुष्करिणिकाप्लवनिर्मलांगाः श्रेयोर्थिनो हरविरिं
चिसनंदनाद्याः द्वारे वसंति वरवेत्रहतोत्तमांगाः ॥
श्रीवेंकचलपते तव सुप्रभातं १५ सेवापराश्शिव
सुरेशकृशानुधर्मरक्षोम्बुनाथपवमानधनाधिना
थाः बद्धांजलिप्रविलसन्निजशीर्षदेशाः श्रीवें
कटाचलपते तव सुप्रभातं १६ धाटीषु ते विहगरा
जमृगाधिराजनागाधिराजगजराजहयाधिराजाः
स्वस्वाधिकारमहिमाधिकमर्थयंते श्रीवेंकटाच
लपते तव सुप्रभातं १७ सूर्येन्दुभौमबुधवाक्पति

लनृसिंहवर्णिन् स्वामिन्परश्वथतपोधनरामचंद्र
शेषांशरामयदुनंदनकल्किरूप श्रीवेंकटाचलप
ते तव सुप्रभातं २४ एलालवंगघनसारसुगंधिती
र्थं दिव्यं वियत्सरिति हेमघटेषु पूर्णं धृत्वाद्य वैदिकशि
खामणयः प्रहृष्टाः तिष्ठंति वेंकटपते तव सुप्रभातं
२६ भास्वानुदेति विकचानि सरोरुहाणि संपूरयंति
निनदैः ककुभो विहंगाः श्रीवैष्णवाः सततमंगलवें
कटाचलपते तव नाहि सुप्रभातं २७ ब्रह्मादयः
मार्षि सुरवराः समहर्षयस्ते संतः सनंदनमुखास्त्वथयो
गिवर्याः धामांतिके तव हि मंगलवस्तुहस्ताः श्रीवें
कटाचलपते तव सुप्रभातं २८ लक्ष्मीनिवासनिर
वद्यगुणैकसिंधो संसारसागरसमुत्तरणैकसेतो
वेदांतवेद्य निजवैभव भक्तभोग्य श्रीवेंकटाचलपते तव
सुप्रभातं २९ इत्थं वृषाचलपतेरिह सुप्रभातं ये मा
नवाः प्रतिदिनं पठितुं प्रवृत्ताः तेषां प्रभातसमये स्मृ
तिरंगभाजां प्रज्ञां परार्थसुलभां [illegible] परमां प्रसूते २६ क

कमलाकुचचूचुककुंकुमतो नियतारुणितातुल
नीलतनोः कमलायतलोचनलोकपते विजयीभव
वेंकटशैलपते ३१ सचतुर्मुखषण्मुखपंचमुखप्र
मुखाखिलदैवतमौलिमणेः शरणागतवत्सलसा
रनिधे परिपालय मां वृषशैलपते ३२ अतिवेलतया
तव दुर्विषहैरनुवेलकृतैरपराधशतैः भरितं त्व
रितं वृषशैलपते परया कृपया परिपाहि हरे ३३
अधिवेंकटशैलमुदारमतेर्जनताभिमताधिकदा
नरतात् परदेवतया गदितान्निगमैः कमलादयितान्न प
रं कलये ३४ कलवेणुरवावशगोपवधूशतकोटि
वृतात्स्मरकोटिसमात् प्रतिवल्लविकाभिमतात्सु
खदात् वसुदेवसुतान्न परं कलये ३५ अभिरामगु
णाकर दाशरथे जगदेकधनुर्धर धीरमते रघुनाय
क राम रमेश विभो वरदो भव देव दयाजलधे ३६
अवनीतनयाकमनीयकरं रजनीकरचारुमुखांबु
रुहं रजनीचरराजतमोमिहिरं महनीयमहं ३७ ३